CC-0.In Public Domain. Digitization by eGangotri

अथ रुद्राभिषेक तथा

पूजाविधिसहित रुद्रपद्धतिः

प्रारम्भः

बुद्धिसागर पराजुली

प्रकाशक- रत्न पुस्तक भण्डार, भोटाहिटी, काठमाडौं, नेपाल

सं० २०६०

मूल्य :

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri



Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

प्रस्तावना

रुद्राभिषेकविधि धेरै प्रकारका छन्, तर हाम्रो नेपालमा चलेको चलन-अनुसारका पद्धति छापिएका छैनन् । पुराना पद्धतिहरूलाई पनि मनपरी फेरफार गरी जसले जस्तो फेला पाऱ्यो उस्तै छापेका छन् । नेपालीहरूमा पद्धतिमा समानरूप ल्याउनाका निमित्त पण्डित वाचस्पतिहरू-समेतले नेपालमा चलाएका पद्धति र वसुधारामन्त्र, शान्त्यध्यायहरूको समेत क्रमिक समावेश गरी २०१८ तथा २०२२ वि० सालमा श्रीपशुपतिनाथमा गरिएको रुद्रानुष्ठानको सरणिको समेत अनुसरण गरी यो रुद्राभिषेकविधिको रचना गरिएको छ, यसबाट

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नेपालीहरूका रुद्रानुष्ठानमा सर्वत्र समानरूप आओस् भन्ने अभिलाषा राखिएको छ। केही त्रुटि भए विद्वान्हरूले संशोधन गर्ने सुझाउ दिनुहुनेछ। पछि संशोधन गरिनेछ।

काठमाडौं, नेपाल
२०२४–९–२४

विद्वान्हरूको पाउको धूलो—
बुद्धिसागर पराजुली
अध्यक्ष :—राष्ट्रिय अभिलेखालय

तन्त्राचार्यमाधवप्रसादलामिछानेशर्म्मण: पुस्तकमिदम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥

अथ रुद्रपद्धतिः

रुद्रानुष्ठानं त्रिविधं—होमात्मकं जपात्मकं अभिषेकात्मकं च। तत्र होमात्मकरुद्रानुष्ठाने कुण्डमण्डपरचना स्वाहान्तमन्त्रविधिश्च श्रौतस्मार्त्तनिबन्धानालोच्य विज्ञेयः। प्रकृतस्तु प्रयोगविधिः जपात्मके अभिषेकात्मके च उपयोगी। तत्रापि अभिषेकात्मकः प्रयोगविधिर्लिख्यते।

आदौ सामग्रीं संपाद्य पुरोहितः कर्मपात्रं कृत्वा तज्जलेन वेदिं परिषिच्य रङ्गवल्लीं कुर्यात्। तत्र यथायथं तत्तत्स्थाने दीप-गणेश-कलशस्थापनं कुर्यात्। गन्धाक्षतपुष्पाणि अर्घपात्रं जलपात्रं धूपदीप- ॥३॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

CC-0. In Public Domain. Digitization by eGangotri

नैवेद्यानि नानाविधानि फलानि ताम्बूलादिकं बिल्वपत्रादिकं त्रिपदी-
सहितं जलधारापात्रं च आसादयेत् । यजमानासनम् आचार्यासनं
पाठकब्राह्मणासनं च स्थापयेत् । ततः साक्षतान् सर्षपानादाय
ॐअपसर्पन्तु ते भूता ये भूता भूमिमाश्रिताः । ये भूता विघ्नकर्तारस्ते
नश्यन्तु शिवाज्ञया ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः ।
सर्वेषामविरोधेन शिवकर्म समारभे ॥ इति सर्वतो विकीर्य । ॐ ईश्वराय
नमः पूर्वस्याम्, आग्नेयेश्वराय नम इत्याग्नेय्याम्, यमेश्वराय नम
इति दक्षिणस्यां, निर्ऋतीश्वराय नम इति नैर्ऋत्यां, वरुणेश्वराय नम
इति पश्चिमायां, वायव्येश्वराय नम इति वायव्यां, सोमेश्वराय नम
इति उत्तरस्याम्, ईशानेश्वराय नम इति ऐशान्याम्, आकाशेश्वराय
नम इति ऊर्ध्वम्, अनन्तेश्वराय नम इति भूमौ, सर्वेश्वराय नम इति
सर्वत आत्मरक्षां कुर्यात् । ततो यजमानः पूजास्थानमागत्य स्वासने

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

समुपविश्य आचम्य दीपं प्रज्वाल्य प्रायश्चित्तगोदानं कृत्वा ब्राह्मण-
CC-0.In Public Domain. Digitization by eGangotri
द्वारा स्वस्तिवाचनं कारयेत् । भूतशुद्धिं प्राणायामं च स्वयं कुर्यात् ।

स्वस्तिवाचनम् । ॐ आनोभद्राः क्रतवोयन्तुविश्वतोदब्धासोऽअपरीतास-
उद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥ १ ॥
देवानांभद्रासुमतिर्ऋजूयतान्देवानां ँ रातिरभिनोनिवर्त्तताम् ॥ देवानां ँ सख्य-
मुपसेदिमाव्वयन्देवानऽआयु ६ प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहेव्व-
यम्भगम्मित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंव्वरुण६सोमंमश्विनासरस्वतीनःसु-
भगामयस्करत् ॥ ३ ॥ तन्नोव्वातोमयोभुव्वातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥
तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायवम् ॥ ४ ॥ तमीशानञ्जग-
तस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानोयथाव्वेदसामसद्वृधेरक्षितापा-
युरदब्धःस्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्वस्तिनः पूषाविश्ववेदाः ॥ ॥५॥
स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥ ६ ॥ पृषदश्वामरुतः पृश्नि-
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मातरःशुभंय्यावानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवः सूरचक्षसोव्विश्वेनोदेवाऽ-
अवसागमन्निह ॥ ७ ॥ भद्रङ्कर्णेभिःश्रृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥
स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहिदेवहितं यदायुः ॥

ततः प्रतिज्ञासङ्कल्पं कृत्वा वरणसामग्रीं पुण्याहवाचनसामग्रीं च सज्जीकृत्य ब्राह्मणवरणं कृत्वा पुण्याहवाचनं कारयेत् ।

रुद्राभिषेके ब्राह्मणवरणम् । यथोचितामुपपन्नां वरणसामग्रीं (जलभाजनोत्तरीयान्तरीयचन्दनाक्षतपुष्पादिकाम्) सम्पाद्य कुशादी-न्यादाय हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे प्रथमचरणे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

भारतवर्षे भरतखण्डे जम्बूद्वीपे आर्यावर्तान्तर्गते हिमवद्दक्षिणपार्श्वे
CC-0.In Public Domain. Digitization by eGangotri
वाग्मत्याः पश्चिमे तीरे इह पुण्यभूमौ[1] (पाशुपतक्षेत्रे) विक्रमसंवत्सरे बौद्धावतारे षाष्टिसंवत्सराणां मध्येऽमुकनाम्नि संवत्सरेऽमुकायनेऽमुकऋतौ अमुकमासेऽमुकपक्षेऽमुकवासरेऽमुकतिथौ अमुकराशिस्थिते श्रीसूर्येऽमुकराशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगणविशिष्टायां शुभपुण्यतिथौ अद्येह मम सभार्यस्य सपुत्रस्य सकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तरहर्षविजयोदयपूर्वकदारिद्र्यदुःखदुर्भिक्षदौर्मनस्यदौर्भाग्योपसर्गमहामारीत्रासोल्कापातनिर्घातभूकम्पादिसूचितदोषोपशमनार्थं, दुःस्वप्नसुस्वप्नतावाप्तिपूर्वकबालग्रहदशान्तर्दशागोचरदशादोषोपशान्त्यर्थं, बाह्याभ्यन्तरज्वरातिसारापस्मारश्वासकासादिसमस्तरोगाणां झटिति निवृ-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

१. यत्र देशे कर्म क्रियते तस्य नामोल्लेखः कर्तव्यः ।

CC-0 In Public Domain. Digitization by eGangotri

त्तिपूर्वकमारोग्यावाप्तिपुरःसरं श्रीसाम्बसदाशिवप्रीतये दीपकलशगणेश-पूजनपूर्वकं श्रीसाम्बसदाशिवोपरि अविच्छिन्नजलधारया (दुग्धादि धा-रया वा) अभिषेकं कर्तुं, तथा श्रीमहाकालीश्रीमहालक्ष्मीश्रीमहासरस्वती-प्रसादसिद्धये मार्कण्डेयपुराणान्तर्गतसप्तशतीस्तोत्रस्य यथासंख्यावृत्ति-केवलपाठकर्म कर्तुं 'मार्कण्डेय उवाच इत्यारभ्य सावर्णिर्भविता मनुः' इतिपर्यन्तं प्रतिमन्त्रं 'शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्ति-हरे देवि नारायणि नमोऽस्तु ते' इति मन्त्रेण अन्येन वा रोगानशेषा-नित्यादिमन्त्रेण यथासंख्यावृत्तिसंपुटितपाठकर्म कर्तुं वा तथाऽस्मि-न्कर्मणि परमेश्वरप्रीतिद्वारा सर्वाभ्युदयावाप्तये[1] पुण्याहवाचनं च कर्तुं अमुकगोत्रम् (अमुकगोत्रान् वा) ब्राह्मणम् (ब्राह्मणान् वा) एभि-श्चन्दनपुष्पाक्षतादिभिरहं वृणे ॥ ॐ वृताऽस्मि (वृताः स्म वा)

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

१, पुण्याहवाचनार्थं वरणसामग्रीतो विशेषेण वस्त्रं दध्यक्षतं दूर्वा पूगफलं द्रव्यं च अधिकं देयम् ।

इति प्रतिवचनम् । यथाविहितं कर्म्म कुरु (कुरुत) । करवाणि (करवाम वा) इति प्रतिवचनम् ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ पुण्याहवाचनम् ॥ पूर्वोक्तरीत्या कृतवरणान् चतुरः पञ्च वा ब्राह्मणान् प्रत्यङ्मुखान् कृत्वा प्राङ्मुखो यजमानः कृताञ्जलिः— [ॐ तत्सत् पूर्वसंकल्पसिद्धिरस्तु अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम अभीष्टावाप्तये करिष्यमाणरुद्राभिषेककर्मणि भो ब्राह्मणाः !] ॐ पुण्याहं (१) भवन्तो ब्रुवन्तु इति त्रिवारमुच्चैर्वदेत् । ब्राह्मणाश्च ॐ पुण्याहम् इति त्रिवारमुच्चैः प्रतिवदेयुः । ततो ब्राह्मणाः—ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥ इत्युच्चैः पठेयुः । ततो यजमानः काष्ठकान्तर्गतं पूर्ववाक्यमुच्चार्य ॐ स्वस्ति (२) भवन्तो ब्रुवन्तु ३ इति त्रिः ब्राह्मणाश्च ॐस्वस्ति ३ इति त्रिरुक्त्वा ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

वृद्ध- ॥१०॥

न: पूषा: विश्ववेदा: । स्वस्ति नस्ताक्ष्यौंऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ इति पठेयुः । पूर्ववत् संकल्पं पठित्वा । यजमानः ॐ ऋद्धिम् (३) भवन्तो ब्रुवन्तु ३ इति त्रिः, ब्राह्मणाः—ॐ ऋद्धिः ३ ॐ सत्रस्यऽऋद्धिरस्यगन्मज्ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामाविदाम देवान्त्स्वज्ज्योतिः ॥ पूर्ववत् संकल्पं पठित्वा यजमानः—ॐ वृद्धि (४) भवन्तो ब्रुवन्तु ३ इति त्रिः । ब्राह्मणाश्च ॐ वृद्धिः ३ । ॐ ज्यैष्ठ्यञ्चमऽआधिपत्यं च मे मन्युश्चमे भामश्चमे मश्चमे भश्चमे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् । इति । पूर्ववत् संकल्पं पठित्वा यजमानः—ॐ कल्याणं (५) भवन्तो ब्रुवन्तु ३ इति त्रिः, ब्राह्म०—ॐकल्याणं ३ । ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्या ८ शूद्राय

CC-0.In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

चार्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह
CC-0.In Public Domain. Digitization by eGangotri
भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु ॥ इति । पूर्ववत् ५०
रुद्र- संकल्पं पठित्वा यज०——ॐ शान्ति (६) भवन्तो ब्रुवन्तु इति ३ इति
॥१२॥ त्रिः । ब्राह्म०—ॐशान्तिः ३ । ॐ द्यौः शान्तिरन्तरिक्ष ᳪ᳭ शान्तिः
पृथिवी शान्तिरापः शान्तिरोषधयः शान्ति । व्वनस्पतयः शान्तिर्व्वि-
श्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ᳪ᳭ शान्तिः शान्तिरेव शान्तिः सामा
शान्तिरेधि ॥ इति । पूर्ववत् संकल्पं पठित्वा यज०——ॐ श्रियं (७)
भवन्तो ब्रुवन्तु ३ । इति त्रिः । ब्राह्मणाः——ॐ श्रीः ३ ॐ मनसः
काममाकूतिंवाचः सत्यमशीय । पशूनाᳪ᳭रूपमन्नस्य रसो यशः श्रीः
श्रयताम् ॥ इति पठित्वा—ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं
महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतं संवत्सरं दीर्घमायुः ॥ ॥१२॥
मन्त्रार्थाः सफलाः सन्तुः पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशो
Prof. Mahdav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ऽस्तु मित्राणामुदयोऽस्तु वः । अव्याधिना शरीरेण मनसा च निराधिना । पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् । इति पठन्तः साक्षतदूर्वादलपूगीफलानि यजमानायार्पयेयुरिति । तत आचार्यः स्वयं वा दीपकलशगणेशादीनां पूजां कुर्यात् । तत्प्रकारश्च यथा—

अथ दीपपूजा

पृष्टोदिवीति प्रज्वाल्य ॥ ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविशेष ॥ वैश्वानरः सहसा पृष्टोऽ अग्निः सनो दिवा सरिषस्पातु नक्तम् ॥ नमोऽस्त्वनन्तायेति पूजयेत् ॥ नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः । नमस्ते इत्यादिना प्रणमेत् ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥ वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ॥ सर्वभूत-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

निवासोऽसि वासुदेव नमोऽस्तु ते ॥ शुभं भवतु कल्याणमारोग्यं
CC-0.In Public Domain. Digitization by eGangotri
सुखसम्पदः ॥ मम शत्रुविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥
इति दीपपूजा ॥

अथ कलशस्थापनम्

ईशानदिग्भागेऽव्रणं सुशोभितं तैजसं मृण्मयं वा कलशं धान्योपरि स्थापयेत् । तत्प्रकारश्च यथा—भूरसीति भूमिं संशोधयेत् । ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीं यच्छ पृथिवीं दृ ꣳ ह पृथिवीं माहि ꣳ सीः ॥ धान्यमसीति धान्यं स्थापयेत् ॥ ॐ धान्यमसि धिनुहि देवान्प्राणायत्वोदानायत्वा-व्यानायत्वा ॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनां पयोसि ॥ आजिघ्रेति धान्योपरि कलशं स्थापयेत् ॥ ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ।
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

पुनरूर्जा निवर्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्मा
त्रिशताद्रयिः ॥ इमम्मे इत्यादिना गङ्गे चेत्यादिना च तीर्थजलं
प्रक्षिपेत् ॥ ॐ इमम्मे वरुण श्रुधीहवमद्या च मृडय ॥ त्वामवस्युरा-
चके ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिन्धु-काबेरी
जलेऽस्मिन्सन्निधिं कुरु ॥ या ओषधीरिति सर्वौषधीः प्रक्षिपेत् ॥
ॐ याऽओषधीः पूर्वाजाता देवेभ्यस्त्रियुगं पुरा ॥ मनैनुबभ्रूणामह ꣳ
शतं धामानि सप्त च ॥ हिरण्यगर्भ इति पञ्चरत्नानि ॥ ॐ हिरण्य-
गर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ॥ सदाधार पृथिवी-
न्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ या फलिनीरिति पूगीफलम्—
या फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूता-
स्तानोमुञ्चन्त्व ꣳ हसः ॥ यवोसीति यवान्—ॐ यवोसियवयास्मद्द्वेषो- ॥१४॥
यवयारातीः।दिवेत्वान्तरिक्षायत्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

पितृषदनमसि ॥ CC-0 In Public Domain. Digitization by eGangotri गन्धद्वारामिति गन्धम् ॥ ॐ गन्धद्वारां दुराधर्षां
नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ ५०
॥१५॥ काण्डात्काण्डादिति दूर्वाम्——ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः
परुषस्परि ॥ एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ स्योनापृथिवीति
सप्तमृदः——ॐ स्योनापृथिविनो भवानृक्षरानिवेशनी ॥ यच्छानः
शर्मसप्रथाः ॥ अश्वत्थेव इति मुञ्जपल्लवैस्तन्मुखमाच्छादयेत्——ॐ अश्व-
त्थेवो निषदनं पर्णे वो वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथ-
पूरुषम् । बृहस्पते इति वस्त्रयुग्मेन वेष्टयेत्——ॐ बृहस्पतेऽअतियदर्यो-
ऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मा-
सुद्रविणं धेहि चित्रम् । उपयामगृहीतोसिबृहस्पतये त्वैषतेयोनिर्बृहस्प-
तयेत्वा ॥ प्रजापतेनेति दध्यक्षतैर्भूषयेत्——ॐ प्रजापते नत्वदेतान्यन्यो ॥१५॥
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal
विश्वारूपाणि परिता बभूव ॥ यत्कामास्ते ज्ञुहुमस्तन्नोऽअस्तु वय ६

CC-0. In Public Domain. Digitization by eGangotri

स्यामपतयोरयीणाम् ।। पूर्णादर्वीति कलशोपरि पूर्णपात्रं निधाय[1] ।।
ॐ पूर्णादर्विपरापत सुपूर्णा पुनरापत ।। वस्नेवविक्रीणाऽवहाऽइषमूर्जं ६
शतक्रतो ।। तत्र तत्त्वायामीति वरुणमावाह्य पञ्चोपचारैः पूजयेत् ।।
ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।।
अहेडमानो वरुणेहवोद्ध्युरुश ६ समानऽआयुः प्रमोषीः ।। तत्रैव
सर्वे समुद्रा इति तीर्थान्यावाहयेत् ।। सर्वे समुद्राः सरितस्तीर्थानि
जलदा नदाः । आयान्तु यजमानस्य दुरितक्षयकारकाः ।। ततः कलशं
स्पृष्ट्वा ऽभिमन्त्रयेत् ।। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।। कुक्षौ तु सागराः
सप्त सप्तद्वीपा वसुन्धरा ।। ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।। ततः कलशं प्रार्थयेत्–

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

१. इदं कृताकृतम् ।

देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विधृतो
CC-0.In Public Domain. Digitization by eGangotri
रुद्र- विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमे- प०
॥१७॥ वासि विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्रा विश्वेदेवाः
सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदः ॥ त्वत्प्रसादा-
दिमां पूजां कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु देवेश प्रसन्नो भव
सर्वदा ॥ इति ॥

अथ गणेशपूजनम्

पूर्वसङ्कल्पमुच्चार्य, अमुकगोत्रस्यामुकशर्मणो ममामुककर्मणो
निर्विघ्नपरिसमाप्तिपूर्वकं स्वाभिलषितसिद्धये सिद्धिदातुः श्रीमन्महा- ॥१७॥
गणाधिपतेर्यथालब्धोपचारैर्यथाबुद्धिपूजनमहं करिष्ये ॥ अथावाहनम् ॥
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳहवामहे व्वसोमम ॥ आहमजानिगर्भधमात्त्वमजासिगर्भधम् ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितसाङ्गसायुधसवाहनसपरिवार श्रीमन् महागणाधिपते ! इहागच्छ इह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव इत्यावाह्य ॐ नमः सिद्धिबुद्धिसहिताय साङ्गाय सायुधाय सवाहनाय सपरिवाराय श्रीमते महागणाधिपतये इदमासनम्, पाद्यम्, अर्घ्यम्, आचमनीयम्, स्नानीयम्, पुनराचमनीयम्, वस्त्रम्, यज्ञोपवीतम्, चन्दनम्, अक्षतान्, पुष्पाणि, धूपम्, दीपम्, नैवेद्यम्, पूगीफलम्, ताम्बूलम्, फलम्, दक्षिणाम् समर्पयामीति यथालाभमुपचारान्समर्प्य पात्रस्थं नारिकेलाद्यन्यतमं फलं हस्ताभ्यामादाय—ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयङ्कर्ता त्राता भव भवार्णवात् ॥ द्वैमातुर

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कृपासिन्धो षाण्मातुर जगत्प्रभो ॥ वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ॥ अनेन फलदानेन सफलोऽस्तु सदा मम ॥ इति फलं समर्पयेत् ॥ ततः—सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ । अविघ्नं कुरु मे देव प्रसन्नो भव सर्वदा ॥ स्वपादपद्मप्रणत भक्त-कल्याणकारिणे ॥ विघ्नवल्लीकुठाराय गणाधिपतये नमः ॥ इति प्रार्थयेत् ॥

—:०:—

CC-0 In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

❁ अथ रक्षाबन्धनपूजा ❁

यवदूर्वासर्षपचन्दनगोमयदधिसहितं पीतं रक्षासूत्रं ताम्रपात्रे धृत्वा पात्रं स्पृशन्नारायणकवचं पठेत् । यथा——ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते । वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः । ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु महीधरः । एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ॥ इत्यादि ॥ ततः पञ्चोपचारैः पूजयेत् । तत्र मन्त्राः——नतद्रक्षाᳬसि न पिशाचास्तरन्ति देवानामोजः प्रथमजᳬ ह्येतत् । यो बिभर्ति दाक्षायणᳬ हिरण्यᳬ सदेवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ १ ॥ यदाबध्नन्दाक्षायणा हिरण्यᳬ शतानीकाय सुमनस्यमानाः । तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ २ ॥ ॐ रक्षोहणं

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

बलगहनंव्वैष्णवीमिदमहन्तं बलगमुत्किरामियम्मे निष्ट्यो यममात्यो
CC-0.In Public Domain. Digitization by eGangotri
निचखानेदमहन्तं बलगमुत्किरामि यम्मे समानो यमसमानो
निचखानेदमहन्तं बलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निच-
खानेदमहन्तं बलगमुत्किरामि यम्मे सजातो यमसजातो निच-
खानोत्कृत्याङ्किरामि ॥ ३ ॥ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा
जनराडसि रक्षोहा सर्वराडस्यमित्रहा ॥ ४ ॥ रक्षोहणो वो बलगहनः
प्रोक्षामि व्वैष्णवान् रक्षोहणो वो बलगहनो वनयामि वैष्णवान्
रक्षोहणो वो ब्बलगहनो वस्तृणामि व्वैष्णवान् रक्षोहणौ वां
बलगहनाऽउपदधामि व्वैष्णवी रक्षोहणौ वां बलगहनौ पर्यूहामि
व्वैष्णवी व्वैष्णवमसि व्वैष्णवास्थ ॥ ५ ॥ त्वं यविष्ठ दाशुषो नॄँः
पाहि शृणुधी गिरः रक्षातोकमुतत्मना ॥ ६ ॥ सप्त ऋषयः प्रतिहिताः
शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतोलोकमीयुस्तत्रजा
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

ग्रतोऽअस्वप्नजौसत्रसदौ च देवौ ॥७॥ इति॥ततः कलशस्कन्धप्रदेशे—
गणपत्यादिपञ्चायतनान्, सूर्यादिनवग्रहान्, विनायकादि-पञ्चलोकपालान्, ईश्वराद्यधिदेवान्, अग्न्यादिप्रत्यधिदेवान्, इन्द्रादि-दशदिक्पालान्, ध्रुवाद्यष्टवसून्, धात्रादिद्वादशादित्यान्, वीरभद्राद्येका-दशरुद्रान्, गौर्यादिषोडशमातॄः, आवाहनादिसप्तमरुतः, विनायक-ब्रह्म-विष्णु-रुद्रार्क-वनस्पतीन् आवाह्य, नाममन्त्रेण यथासम्पादितपाद्यादि-धूपदीपनैवेद्यान्तैरुपचारैः पूजयेत् ॥ ततः प्रार्थयेत् । सूर्यः शौर्य-मथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः । सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः ॥ राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूलाः ग्रहाः ॥ इति ॥ ततः प्रधानदेवतां साम्बसदाशिवं पूजयेत् । तत्प्रकारश्च यथा—आदौ ध्यानम् ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्ना-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

कल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समन्तात्
CC-0.In Public Domain. Digitization by eGangotri
स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं
रुद्र- पञ्चवक्त्रं त्रिनेत्रम् ॥ भो साम्बसदाशिव इहागच्छ इह तिष्ठ इह प०
॥२३॥ संनिधेहि इह निरुध्यस्व इह संमुखो भव इहावगुण्ठितो भव इह शकली-
कृतो भव इहामृतीकृतो भव इह परमोद्धती भव इति आवाहनादिमुद्राः
प्रदर्शयेत् । आवाहनम्—एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले
वृषभाधिरूढ ॥ देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ॥
ॐ नमस्ते रुद्र मन्यव० ॥ आसनम्—रम्यं सुशोभनं दिव्यं सर्व-
सौख्यकरं शुभम् ॥ आसनं च मया दत्तं गृहाण परमेश्वर ॥ ॐ या
ते रुद्र० ॥ पाद्यम्—उष्णोदकं निर्मलञ्च सर्वसौगन्ध्यसंयुतम् ॥
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ॐ यामिषुम्० ॥ अर्घ्यम्— ॥२३॥
अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् ॥ करुणाकर देवेश प्रसन्नो
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

भव शङ्कर ॥ ॐ शिवेन वचसा० ॥ आचमनीयम्—सर्वतीर्थ-समा-युक्तं सुगन्धि विमलं जलम् ॥ आचम्यतां मया दत्तं चन्द्रशेखर शङ्कर ॥ ॐ अध्यवोच० ॥ स्नानीयम्— गङ्गा-सरस्वती रेवा-पयोष्णी-नर्मदाजलैः ॥ स्नापितोऽसि मया देव ततः शान्ति कुरुष्व मे ॥ ॐ असौ यः ॥ पञ्चामृतस्नानम्, तत्रादौ पयसा—कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐ पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ शुद्धोदकस्नानम्—ॐ आपो-ऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वꣳहिरि-प्रम्प्रवहन्तिदेवीरुदिदाभ्यः शुचिरापूतऽएमि ॥ दध्ना—ॐ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यर्पितं मया देव स्नानाय प्रति गृह्यताम् ॥ ॐ दधिक्राब्णोऽअकारिषञ्जिष्णोरश्वस्यव्वाजिनः ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri
सुरभिनो मुखाकरत्प्रणऽआयू६ षितारिषत ॥ शुद्धोदकस्नानम्——
ॐ आपोऽअस्मान्० ॥ घृतेन—नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ॥ प०
रुद्र- घृतं तुभ्यं ददाम्येतत्स्नानाय प्रतिगृह्यताम् ॥ ॐ घृतम्मिमिक्षे घृत-
॥२५॥ मस्ययोनिर्घृतेश्रितो घृतम्वस्य धाम ॥ अनुष्वधमावहमादयस्वस्वाहा
घृतंवृषभम्वक्षिहव्यम् ॥ शुद्धोदकस्नानम्——ॐ आपोऽअस्मान्० ॥
मधुना—तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥ तेजः पुष्टिकरं दिव्यं
स्नानार्थं प्रतिगृह्यताम् ॥ ॐ मधुव्वाताऽऋतायते मधुक्षरन्तिसिन्धवः ॥
माध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥
मधुद्यौरस्तुनः पिता ॥ मधुमान्नोव्वनस्पतिर्मधुमाँ२ऽअस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥ शुद्धोदकस्नानम्——ॐ आपोऽअस्मान्० ॥ ॥२५॥
शर्करया—इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥ मलापहारिणी
दिव्या स्नानाय प्रतिगृह्यताम् ॥ ॐ अपा ꣳरसमुद्वयसꣳसूर्ये सन्तꣳ
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

समाहितम् ॥ अपाꣳरसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतो-
CC-0 In Public Domain. Digitization by eGangotri
रुद्र- सीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ शुद्धोदक- प०
॥२६॥ स्नानम्—ॐ आपोऽअस्मान्० ॥ गन्धोदकस्नानम्—मलयाचलसम्भूत-
चन्दनागरुवासितम् ॥ सलिलं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् ॥ उद्वर्तनस्नानम्—नानासुगन्धिद्रव्यं च चन्दनं
रजनीयुतम् ॥ उद्वर्तनं मया दत्तं गृहाण शशिशेखर ॥ ॐ अꣳ-
शुनाते अꣳशुः पृच्यताम्परुषा परुः ॥ गन्धस्तेसोममवतुमदाय-
रसोऽअच्युतः ॥ पुनः शुद्धोदकस्नानम्—ॐ आपोऽअस्मान्० ॥
ततः ॐ साम्ब सदाशिवाय नमः इति नाममन्त्रेण गन्धाक्षतबिल्व-
पत्रधूपदीपनैवेद्यानि समर्प्य, गणानान्त्वेत्यादिभिर्मन्त्रैः सङ्कल्पिता- ॥२६॥
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.
वृत्तिभिरभिषेकं कुर्यात् ॥

CC-0.In Public Domain. Digitization by eGangotri

अथ रुद्राभिषेकः ॥ कर्ता यजमानः ब्राह्मणो वा आदौ षडङ्गन्यासान् कुर्यात् ॥ तत्र क्रमः ॥ अद्य पूर्वोच्चारितगुणविशिष्टायां शुभपुण्यतिथौ मम आत्मनः यजमानस्य वा श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थम्, अमुककामनासिद्ध्यर्थम्, अमुकद्रव्येण श्रीभवानीशङ्करदेवताप्रीत्यर्थम्, अमुकरुद्राभिषेकमहं करिष्ये तदङ्गतया शरीरशुद्ध्यर्थं विहितान् लघुषडङ्गन्यासांश्च करिष्ये ॥ ॐ मनोजूतिरितिमन्त्रस्य बृहस्पतिः ऋषिः, बृहस्पतिर्देवता, बृहतीछन्दः हृदयन्यासे जपे विनियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवाऽइहमादयन्तामोंऽ२प्रतिष्ठ ॥ ॐ हृदयनाय नमः ॥ १ ॥ ॐ अबोध्यग्निरितिमन्त्रस्य बुधगविष्ठिरऋषिः, अग्निर्देवता त्रिष्टुप्छन्दः शिरोन्यासे जपे विनियोगः ॥ ॐ अबोद्ध्यग्निः समिधा जनानाम्प्रति धेनुमिवायती-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

मुषासम् ॥ यद्वाऽइव पथ्यामुञ्जिहानाऽप्रमानवः सिस्रते नाकमच्छ ॥ CC-0. In Public Domain. Digitization by eGangotri

ॐ शिरसे स्वाहा ॥ २ ॥ ॐ मूर्द्धानमिति मन्त्रस्य भरद्वाजऋषिः, अग्निर्देवता, त्रिष्टुप्छन्दः, शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या व्वैश्वानरमृतऽआजातमग्निम् ॥ कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्त्रञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ ॐ मर्माणि ते इति मन्त्रस्य अप्रतिरथऋषिः, मर्माणि देवता, विराट्छन्दः, कवचन्यासे जपे विनियोगः ॥ ॐ मर्माणिते- वर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु । ॐ कवचाय हुम् ॥ ४ ॥ विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवन ऋषिः, विश्वकर्मा देवता, त्रिष्टुप् छन्दः नेत्रन्यासे जपे विनियोगः ॥ ॐ विश्वतश्चक्षुरुतविश्वतो- मुखोव्विश्श्वतोबाहुरुतव्विश्श्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पत-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र- ||२९|| त्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मान-
CC-0.In Public Domain. Digitization by eGangotri
स्तोके इति मन्त्रस्य परमेष्ठी ऋषिः, एकरुद्रो देवता, जगतीच्छन्दः, ५०
अस्त्रन्यासे जपे विनियोगः ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानो-
गोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्न्रुद्रभामिनोव्वधीर्हविष्मन्तः
सदमित्त्वा हवामहे ॥ ॐ अस्त्राय फट् ॥ ६ ॥ इति न्यासान् विधाय
पूजायां विहितध्यानमन्त्रेण ध्यानं कृत्वा जलधारां सज्जीकृत्य जल-
निक्षेपपात्रं यावदपेक्षितं वस्त्रपूतं जलं च समीपे निधाय आवृत्तिगण-
नार्थं गन्धादिकं च स्थापयित्वा समाहितेन मनसा पाठारम्भः कार्यः
त्रिपद्यां बद्धं रक्षासूत्रं ब्राह्मणाः स्पृशेयुः । अभिषेकपूर्वकं समाप्य ॥

वस्त्रं समर्पयेत्—सर्वभूताधिके सौम्ये लोकलज्जानिवारणे ॥
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ॐ असौयोवसर्पति० । ||२९||
यज्ञोपवीतम्—नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
चोत्तरीयं गृहाण परमेश्वर ॥ ॐ नमोऽस्तुनीलग्रीवाय० । चन्दनम्—
रुद्र- श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ
॥३०॥ चन्दनम् प्रतिगृह्यताम् ॥ ॐ प्रमुञ्च० । अक्षतान्—अक्षतांश्च सुरश्रेष्ठ ५०
कुङ्कुमाक्तान्सुशोभनान् ॥ मया निवेदितान् भक्त्या गृहाण परमेश्वर ॥
ॐ अक्षन्नमीमदन्तह्यवप्रियाऽअधूषत ॥ अस्तोषतस्वभानवोविप्रान-
विष्ठयामतीयोजान्विन्द्रतेहरी ॥ पुष्पाणि—माल्यादीनि सुगन्धीनि
मालत्यादीनि वै प्रभो ॥ मयाऽऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ।
ॐ विज्ज्यन्धनुः० ॥ बिल्वपत्राणि—त्रिदलं त्रिगुणाकारं त्रिनेत्रं च
त्रियायुधम् ॥ त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥ ॐ शिवो-
भवप्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः ॥ माद्यावापृथिवीऽअभिशोचि-
र्म्मान्तरिक्षमामावनस्पतीन् ॥ धूपम्—वनस्पतिरसोद्भूतो गन्धाढ्यो ॥३०॥
गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ॐ याते-
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

होति:० ॥ दीपम्—आज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया ॥
रुद्र- दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥ ॐ परिते० । नैवेद्यम्— प०
॥३१॥ शर्क्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारं समानीतं नैवेद्यं
प्रतिगृह्यताम् ॥ ॐ अवतत्य० । जलं च समर्प्य प्राणादिपञ्चमुद्राः
प्रदर्श्य यथाशक्ति जपं विधाय शेषं समर्प्य उद्धर्तनं दत्त्वा आच-
मनीयम्—एलोशीरलवङ्गादि कर्पूरादि सुवासितम् । प्राशनायाऽऽहृतं
तोयं गृहाण परमेश्वर । फलम्—इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि । इति फलं समर्पयेत् ।
ताम्बूलं—पूगीफलं महादिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादिसंयुक्तं
ताम्बूलं प्रतिगृह्यताम् । नमस्तऽआयुधाया० । दक्षिणाम्—हिरण्य-
गर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं ॥३१॥
प्रयच्छ मे ॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः परिरेकऽ-

CC-0 In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri
आसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषाव्विधेम ॥
रुद्र- कर्पूरार्तिक्यम्—कदलीगर्भसम्भूतं घनसारं मनोहरम् ॥ आरार्तिक्य- ५०
॥३२॥ महं कुर्वे पश्य मे वरदो भव ॥ ॐ इद ꣳ हविः प्रजननम्मेऽअस्तुदश-
वीर ꣳ सर्वगण ꣳ स्वस्तये ॥ आत्मसनिप्रजासनिपशुसनिलोकसन्य-
भयसनि ॥ अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्मासुधत्त ॥
प्रदक्षिणाम्—ॐ यानि कानि च पापानि जन्मान्तरकृतानि च ॥
तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥ ॐ मानोमहान्तमुतमा-
नोऽअर्भकम्मानऽउक्षन्त मुतमानऽउक्षितम् ॥ मानोव्वधीः पितरम्मो-
तमातरम्मानः प्रियास्तन्वोरुद्ररीरिषः ॥ इत्युपचारान्समर्प्य पुष्पाण्या-
दाय बद्धाञ्जलिः प्रार्थयेत्—नानासुगन्धिपुष्पाणि देशकालोद्भवानि
च । पुष्पाञ्जलिर्मया दत्तं गृहाण परमेश्वर ॥ ॐ मानस्तोके तनये ॥३२॥
मानऽआयुषिमानोगोषु मानोऽअश्वेषुरीरिषः ॥ मानो व्वीरान्रुद्रभा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

मिनोऽवधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ततः—आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजां चैव न जानामि प्रसीद परमेश्वर ॥ विधिच्युतं भक्तिहीनमुपचारविवर्जितम् ॥ यत्पूजितोऽसि भगवँस्तेनापीश प्रसीदसि ॥ ग्रहपीडाः प्रशाम्यन्तु भूतबाधा विनश्यतु ॥ ज्वरादयोऽखिला रोगाः विनश्यन्तु त्वदीच्छया ॥ शिव शङ्कर विश्वात्मन् भूतेश्वर दयामय ॥ भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जिताम् ॥ इति क्षमापयेत् ॥ ततः कृतस्य रुद्राभिषेकादिकर्म्मणः साङ्गतायै भूयसीं दद्यात् ॥ तत्र वाक्यम् ॐ अद्येत्यादि० मम श्रीसाम्बसदाशिवप्रीतिद्वारा नानाविधव्याधिप्रशमनपूर्वकनिरुपद्रवायुष्यतावाप्तये (यथासंख्याकावृत्त्या) कृतस्य रुद्राभिषेककर्मणः साङ्गतायै इमां दक्षिणां (यथानामदैवतां) रुद्राध्याय (सप्तशती) पाठकर्तृभ्यो नानानामगोत्रेभ्यो

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal.

ब्राह्मणेभ्यो यथाभागं विभज्य युष्मभ्यमहं सम्प्रददे ॐ तत्सत् न मम ॥
CC-0. In Public Domain. Digitization by eGangotri
इति शुभम् ॥

रुद्र- ॥३४॥ प०

श्रीगणेशाय नमः ॥ अथ कर्ता यजमानः (ब्राह्मणो वा) षडङ्गन्यासान् कुर्यात् ॥ तत्र क्रमः ॥ अद्य पूर्वोच्चारित एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः (यजमानस्य वा) सकलशास्त्रश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थम्, अमुककामनासिद्ध्यर्थम्, अमुकद्रव्येण श्रीभवानीशंकरदेवताप्रीत्यर्थम्, अमुकरुद्राभिषेकमहं करिष्ये ॥ तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघुषडङ्गन्यासाँश्च करिष्ये ॥ ॐ मनोजूतिरिति मन्त्रस्य बृहस्पतिर्ऋषिः, बृहस्पतिर्देवता, बृहतीछन्दः हृदयन्यासे जपे विनियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्जस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञ ꣳ समिमन्दधातु ॥ विश्वेदेवा ऽइहमादयन्तामो३ प्रतिष्ठ ॥ ॐ हृदयाय नमः ॥३४॥
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal
॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधगविष्ठिरऋषिः, अग्निर्देवता त्रिष्टुप

रुद्र- ॥३५॥

छन्दः शिरोन्यासे जपे विनियोगः ॥ ॐ अबोद्ध्यग्निः समिधा जनानाम्प्रती धेनुमिवायतीमुषा सम् ॥ यह्वाऽइवप्प्रवयामुज्जिहानाप्प्र-भानवः सिस्रते नाकमच्छ ॥ ॐ शिरसे स्वाहा ॥ २ ॥ मुर्द्धानमिति मन्त्रस्य भरद्वाजऋषिः, अग्निर्देवता, त्रिष्टुप् छन्दः, शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या व्वैश्वानरमृतऽआजात मग्निम् ॥ कविꣳ सम्म्राजमतिथिञ्जनानामासन्नापात्त्रञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ ॐमर्माणि ते इति मन्त्रस्य अप्रतिरथऋषिः, मर्माणि देवता, विराट्छन्दः, कवचन्यासे जपे विनियोगः ॥ ॐ मर्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयो व्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ ॐकवचाय हुम् ॥४॥ विश्व- ॥३५॥
तश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवन ऋषिः, विश्वकर्मादेवता त्रिष्टुप्-छन्दः नेत्रन्यासे जपे विनियोगः ॥ ॐ व्विश्वतश्चक्षुरुतव्विश्वतोमुखो-

प०

CC-0 In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र०- ॥२६॥ व्विश्श्वतोबाहुरुतव्विश्श्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्त्रैर्द्या-
वाभूमिजनयन्देवऽएकः ॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोके
इति मन्त्रस्य परमेष्ठिः ऋषिः एकरुद्रो देवता, जगतीछन्दः, अस्त्र-
न्यासे जपे विनियागः ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानो
गोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्रुद्र भामिनोव्वधीर्हविष्मन्तः
सदमित्त्वा हवामहे ॥ ॐ अस्त्राय फट् ॥ ६ ॥

—:❋:—

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

श्रीगणेशाय नमः ॥ हरिः ॐ गणानां
रुद्र- ॥३७॥ न्त्वागणपतिꣳ हवामहेप्रियाणान्त्वाप्प्रियपतिꣳ १०
हवामहेनिधीनान्त्वां निधिपतिꣳ हवामहेवसो
मम ॥ आहमंजानि गर्ब्भधमात्वमंजासिगर्ब्भ
धम् ॥ १ ॥ गायत्रीत्रिष्टुप्जगत्यनुष्टुप्पङ्
क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शम्य ॥३७॥
न्तुत्वा ॥ २ ॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्च

CC-0.In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र- ॥३८॥ षट्पदा॑ विच्छन्दायाश्चस च्छन्दा॑ सूचीभि॑ः ५०

शम्यन्तुत्वा ॥ ३ ॥ सुहस्तोमा॑ सुहछन्दसऽआ

वृत॑ः सहप्प्रमाऽऋषय॑ सप्तदैव्या॑ः पूर्वैषाम्प

न्थामनुदृश्य धीराश्रन्वालैभिरे रथ्योनरश्मी

न् ॥ ४ ॥ यज्जाग्रतो दूरमुदैति दैवन्तदुसुप्तस्य

तथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेक ॥३८॥

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

न्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ५ ॥ येन

CC-0.In Public Domain. Digitization by eGangotri

कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विद
रुद्र- थेषु धीराः ॥ यदपूर्वं यक्षमन्तः प्रजानान्तन्मे प०
॥३१॥ मनः शिवसङ्कल्पमस्तु ॥६॥ यत्प्रज्ञानमुतचेतो
धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मा
न्नऽऋते किञ्चनकर्म्म क्रियते तन्मे मनः शिव
सङ्कल्पमस्तु ॥ ७ ॥ येनेदम्भूतम्भुवनम्भ ॥३१॥
विष्यत्परिगृहीतममृतेन सर्वम् ॥ येन यज्ञस्ता

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र- यतैंसुप्तहौंतातन्मेमनंः शिवसंङ्कल्पमस्तु॥८॥ १०

CC-0.In Public Domain. Digitization by eGangotri

॥४०॥ यस्मिन्नृचः सामयजूंषि यस्मिन्प्रतिंष्ठिता
रथनाभाविवाराः ॥ यस्मिँश्चित्तंसर्वमोतंम्प्र
जानान्तन्मेमनंः शिवसंङ्कल्पमस्तु ॥९॥ सुषा
रथिरश्वांनिवयन्न्मंनुष्यान्नेनीयतेभीशुंभिर्वा
जिनऽइव॥हृत्प्रतिंष्ठंयदजिरञ्जविंष्ठन्तन्न्मे ॥४०॥
मनंः शिवसंङ्कल्पमस्तु ॥ १० ॥ इति श्रीरुद्रे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र- ॥४१॥

प्रथमोऽध्यायः ॥१॥ हरिः ॐ ॥ सहस्रशीर्षा
CC-0.In Public Domain. Digitization by eGangotri
पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्वत
स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽएवेदꣳ
सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्त्वस्ये
शानो यदन्नेनातिरोहति ॥२॥ एतावानस्य महि
मातो ज्यायाँश्च पूरुषः ॥ पादोस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवि ॥३॥ त्रिपादूर्ध्वऽउदैत्पुरु
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

षट्पादोऽस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रा

 मत्साशनानशनेऽअभि ॥४॥ ततोविराडजाय

 तविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्य

तपश्चाद्भूमिमथोपुरः ॥५॥ तस्माद्यज्ञात्सर्वहु

तःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेव्वाय

व्यानारण्याग्ग्राम्याश्चये ॥ ६ ॥ तस्माद्यज्ञा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

त्सर्वहुतऽऋचःसामानिजज्ञिरे ॥ छन्दांसि

जज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥
CC-0.In Public Domain. Digitization by eGangotri
तस्म्मादश्श्वाऽअजायन्तयेकेचोभयादतः ॥ गा
वोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः
॥ ८ ॥ तँय्यज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥
तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्श्चये ॥ ९ ॥
यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ॥ मुख
ङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

॥१०॥ ब्राह्मणोऽस्यमुखमासीद्बाहूराजन्यः
कृतः ऊरूतदस्ययद्वैश्यः पद्भ्याᳬ शूद्रोऽअ
जायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोः
सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्च
मुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसी
दन्तरिक्षᳬशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्या

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

म्भूमिर्द्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन्

॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्न्वत ॥
CC-0.In Public Domain. Digitization by eGangotri
व्वसन्तोऽस्यासीदाज्ज्यङ्ग्रीष्ममऽइद्ध्मःशरद्धु
विः ॥ १४ ॥ सप्तास्यासन्न्परिधयस्त्रिःसप्तस
मिधः कृताः ॥ देवायद्यज्ञन्तन्न्वानाऽअबध्न
न्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदे
वास्तानिधर्म्माणिप्प्रथमान्न्यासन् ॥ तेहनाकं ॥४५॥
म्माहिमानः सचन्तयत्रपूर्वेसाद्ध्याःसन्तिदे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

वाः ॥ १६ ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च पु०
विश्वकर्म्मणः समवर्त्तताग्रे ॥ तस्य त्वष्टा विद
धद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १७॥
वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः
परस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः
पन्था विद्यतेऽयनाय ॥ १८ ॥ प्रजापतिश्चरति ग ॥४६॥
र्भेऽअन्तरजायमानो बहुधा विजायते ॥ तस्य

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

योनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्भुव
CC-0.In Public Domain. Digitization by eGangotri
नानिव्विश्वा ॥ १९ ॥ योदेवेभ्यंऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेभ्योजातोनमो
रुचायब्राह्मये॥२०॥ रुचम्ब्राह्मञ्जनयंन्तो
देवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मी
श्चपत्न्यावहोरात्त्रेपार्श्वेनक्षत्त्राणिरूपमश्वि
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

नौह्याँत्तम् ॥ इन्द्रणाम्निषाणामुम्मंऽइषाणसर्व्व

लोकम्मंऽइषाण ॥ २२ ॥ इति श्रीरुद्रे

द्वितीयोऽध्यायः ॥ २ ॥ हरिः ओं आशुःशिशा

नोव्वृषभोनभीमोघनाघन १ क्षोभंणश्चर्षणी

नाम् ॥ सुङ्क्रन्दनोनिमिषऽएकवीरश्शतङ्

सेनांऽअजयत्साकमिन्द्रः ॥ १ ॥ सुङ्क्र

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

न्दंनेनानिमिषेणांजिष्णुनांयुत्कारेणदुश्च्यव

रुद्र- ॥५१॥

नेनधृष्णुना ॥ तदिन्द्रेणजयततत्त्सहद्ध्वँय्युधो

CC-0.In Public Domain. Digitization by eGangotri

घोनरऽइषुहस्तेनव्वृष्णा ॥२॥ सऽइषुहस्तैःस ५०

निषङ्गिभिर्व्वशीसᳪस्त्रष्ट्टासयुधऽइन्द्रोगणेन ॥

सᳪसृष्ट्टजित्त्सोमपाबाहुशर्द्ध्युग्ग्रधन्न्वाप्प्रति

हिताभिरस्ता ॥ ३ ॥ बृहस्प्पतेपरिदीयारथेनर

क्षोहामित्राँ२ऽअपबाधमानः ॥ प्प्रभञ्जन्त्से

ना ÷ प्प्रमृणोयुधाजयन्नस्म्माकमेद्ध्यवितार ॥५१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0.In Public Domain. Digitization by eGangotri

थांनाम् ॥ ४ ॥ बलविज्ञायस्स्थविरःप्रवीरः

 सहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽ

 अभिसंत्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवि

त ॥ ५ ॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्जयन्तम

ज्ज्मंप्रमणन्तमोजसा ॥ इमꣳसजाताऽअनुवी

रयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम् ॥ ६ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

अभिगोत्राणिसहसागाहमानोदयोवीरःशत

मंन्न्युरिन्द्रः॥ दुश्च्यवनः पृतनाषाड्युद्ध्यो
CC-0.In Public Domain. Digitization by eGangotri

स्म्माकꣳसेनाऽअवतुप्प्रयुत्सु॥७॥इन्द्रऽआसा ५०

न्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोमः॥

देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयु

न्त्वग्ग्रम्॥८॥ इन्द्रस्यव्वृष्णोव्वरुणस्यराज्ञऽ

आदित्यानाम्मरुताꣳशर्द्धऽउग्ग्रम्॥ महाम

नसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुद ॥५१॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

रुद्र-
॥५२॥

स्त्थात् ॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वं प०
CC-0.In Public Domain. Digitization by eGangotri
नान्मामकानाम्मनाᳪसि ॥ उद्वृत्रहन्वाजिनां
वाजिनान्युद्रथानाञ्जयताँऽयन्तुघोषा÷ ॥१०॥
अस्माकमिन्द्र ६ समृतेषुद्ध्वजेष्वस्माकं
याऽइषवस्ताजयन्तु ॥ अस्माकंवीराऽउत्तरे
भवन्त्वस्माँ २ऽउदेवाऽअवताहवेषु ॥ ११ ॥ ॥२२॥
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal
अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्य

रुद्र- प्त्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरन्धे
CC-0.In Public Domain. Digitization by eGangotri
॥५३॥ नामित्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टा प०
परापतशरव्येब्रह्मसꣳशिते ॥ गच्छामित्रा
न्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषꣳ ॥ १३ ॥
प्रेताजयतानरऽइन्द्रोवꣳशर्म्मयच्छतु ॥ उग्रा
वःसन्तुबाहवोनाधृष्यायथासथ ॥१४॥ꣳअसौ ॥५३॥
यासेनामरुतꣳ परेषामभ्येतिनऽओजसास्प
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0 In Public Domain. Digitization by eGangotri

ढ्ठमाना ॥ ताडंगूहतुतमुसापब्रतेनुसथामीऽस्त्र
न्योऽअन्यन्नजानन् ॥ १५ ॥ यत्रबाणाःसुम्प
तंन्तिकुमाराविंशिखाऽइव ॥ तन्नुऽइन्द्रोबृह
स्पतिरादिंतिःशर्म्मंयच्छतुव्विश्वाहाशर्म्मंय
च्छतु ॥ १६ ॥ मर्म्माणितेवर्म्मणाच्छादया
मिसोमंस्त्वाराजामृतेनानुंवस्ताम् ॥ उरोर्व्व
रीयोव्वरुणस्तेकृणोतुजयंन्तन्त्वानुदेवामंदन्तु

